CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

SCANNED

॥ श्रीः ॥

श्रीगुरुभ्यो नमः ।

॥ श्रीवेंकटकृष्णविजयः ॥

पुण्यपत्तनस्थदक्षिणमहाविद्यालये (डेक्कनकालेज)
संस्कृतकोशविभागे नियुक्तेन
कृष्णमूर्त्याख्यरामकृष्णेन
लिखितः ।

मद्रपुरीस्थ
'श्रीबालमनोरमा' मुद्रणालये
प्रकाशितः ।

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

॥ श्रीः ॥

श्रीगुरुभ्यो नमः ।

॥ श्रीवेंकटकृष्णविजयः ॥

पुण्यपत्तनस्थदक्षिणमहाविद्यालये (डेक्कनकालेज)
संस्कृतकोशविभागे नियुक्तेन
कृष्णमूर्त्याख्यरामकृष्णेन
लिखितः ।

मद्रपुरीस्थ
'श्रीबालमनोरमा' मुद्रणालये
प्रकाशितः ।

Kirtikant Sharma Collection, Najafgarh

blic Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-M

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

22-5-1869 करुपत्तूरु वेंकटरामशास्त्री 20-5-1927

Kirtikant Sharma Collection, Najafgarh

ublic Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-M

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रस्तावः ।

भारतभूमेरवाच्यां दिशि वेदशास्त्रेषु परिनिष्ठितं वैदुष्यं प्रपद्य चिराय भुवमलंकृत्याद्यत्वे कीर्तिशेषं गतेषु पण्डिततल्लजेषु प्रकृत-कथानायकः करुपत्तूरु वेंकटरामशास्त्री चैकतमः । अयं किल त्रिशिरःपुरीविभागे (Trichi Dt.) क्रैस्त २२-५-१८६९ दिनेऽ-जनिष्ट । अनितरसाधारणपाण्डित्ये बुद्धिप्रकर्षे सारल्ये रसिकतमत्वे च सुप्रसिद्धमेनं तदानींतनो विद्वदवतंसः सर्वोऽप्यजानीत । अद्य जानन्तश्च सन्त्येव कचित्कचित् । केरलप्रान्ते कस्यचित्सुप्रसिद्धस्य वेदशास्त्रकलालयस्य समीचा प्रकारेण प्रायो विंशतिं वत्सरान्निर्वा-हानन्तरं महीशूरराजकीयसंकृतविद्यालये वेदभाष्यप्रधानाध्यापको भूत्वा प्रायः पञ्चं वत्सरान्यापितवानयं अन्ते क्रैस्त २०-५-१९२७ दिने स्वकीयं भौतिकं वपुस्तत्याज ।

आसेतोरातुषाराचलं भारतभुवं सकृत्परिभ्रम्य बहुभिरन्त-र्वाणिभिः लब्धपरिचयस्यास्य परश्शतं शिष्या भारतभूमेस्तत्र तत्र कोणेषु व्यराजन्त विराजन्ते चाद्यापि ।

अस्य हि जीवनचरितं बह्वाश्चर्यसंभवकलितमपि यथावद्विस्त-रेण संविदाना अद्यत्वे विरला एव । अथापि यावद्विदितं तत्संग्र-हीतुं जनोऽयं प्रावृतत् । विद्वद्वराणां चरित्रेषु श्रद्धावन्तो निर्मत्सराः मामकं परिश्रममेनमभिनन्देयुरिति विश्वसन्

लेखकः ॥

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अस्ति [1]संवसथः कश्चिदवाच्याम् "आदनूर्" इति ।
नैकेषां [3]भूनिलिम्पानां यत्र वासः पुरा[2]भवत् ॥ १

क्रोशद्वयपरीणद्धप्रभूतसलिलाशयात् ।
लब्ध्वापो यत्र कैदार्यं [4]स्फायते स्म ततस्ततः ॥ २

यत्र नैकद्रुमौकोभिर्विहगैः कलकूजितैः ।
सारिणीनिःस्रवत्तोयनादै[5]श्चार्हमुखान्यभुः [6]॥ ३

दीर्घरज्जुसमाकृष्टकलशोद्धृतजीवनाः [8]।
ग्रामीणै[9]रन्धवो यत्र निविरीसाँ [10]जनैर्बभुः ॥ ४

युगनद्धवृषाकृष्टमस्त्रा[11]निःसारितादकाः ।
इतरे [12]चासिचन्यत्र क्षेत्राण्यसकृदन्यतः ॥ ५

पिचुमन्दाग्रोपविष्टास्तत्फलास्वादगृध्नवः ।
दरसाचीकृतग्रीवा रटन्ति [15]करटाः कटु ॥ ६

पलाशमुकुलस्पर्धित्रोटयो बीजपूरकम् ।
संविदार्य स्वदन्ते स्म तद्रसं च शुकाः क्वचित् ॥ ७

---

१. ग्रामः, 'समौ संवसथग्रामौ' इत्यमरः. २. दक्षिणस्यां दिशि ३. भूदेवानां ४. केदारसमूहः ५. वर्धते ६. अल्पनदी ७. प्रत्यूषाः, 'प्रत्यूषोऽहर्मुखं कल्यं' इत्यमरः. ८. जीवनशब्दो जलवाची ९. अन्धवः = कूपाः १०. निविडाः ११. चर्मरचितपात्रविशेषः १२. इतरे = अन्धव इति शेषः १३. निम्बवृक्षः १४. किंचिद्वक्रीकृतकन्धरा इत्यर्थः १५. करटाः = काकाः १६. भित्त्वा इत्यर्थः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

आरामेषु प्रफुल्लानां सुमानामन्तरान्मधु ।
कणेहत्य[1] धयन्तस्ते क्षीबाँ[2] भृङ्गा जगुश्चिरम् ॥ ८

प्राभातिकसमीरोर्मिपरिप्लवदला मुहुः ।
पथिकानाह्वयन्तीव कदल्यो यत्र निष्कुटे ॥ ९

एकतश्चालयः शौरेरन्यतोऽन्यः पिनाकिनः ।
तृतीयश्च तथा शास्तुरिति तत्रालयास्त्रयः ॥ १०

अस्ति होमतटाकाख्यो नातिदूरे जलाशयः ।
यत्र प्रत्यूषकर्माणि कर्मठा निरवीवृतन् ॥ ११

ब्राह्मे मुहूर्त उत्थाय वटवो यत्र नित्यशः ।
स्वस्वशाखा अधीयाना बोधयन्ति स्म निद्रितान् ॥ १२

स्त्रियोऽदुहुः पयो धेनूः पूर्वपायिततर्णकाः ।
मन्थैरमन्थिषुः काश्चिन्नक्तमातञ्चितं दधि ॥ १३

वनिता गोमयाम्भोभिः परिमृष्टवितर्दिकाः ।
कटौ कुटानुपादाय यान्ति सिष्णासवः क्वचित् ॥ १४

सोष्णीषशिरसो गोपा वांशयष्टिकराः प्रगे ।
चारयन्तो गवां वृन्दं संचरन्ति ततस्ततः ॥ १५

---

१. अन्तरात् = मध्यात् २. कणेहत्य = अत्यन्तं अभिलष्य तन्निवृत्तिपर्यन्तमित्यर्थः ३. धयन्तः = पिबन्तः ४. मत्ताः ५. परिप्लव = चञ्चल ६. गृहारामे ७. कर्मानुष्ठानपरायणाः ८. तर्णको वत्सः ९. मन्थैः मथनदण्डैः १०. दुग्धे तक्रमिश्रणमातञ्चनम् ११. शोधितवेदिकाः १२. कुटान् कलशान् १३. स्नातुमिच्छन्त्यः १४. शिरोवेष्टनवस्त्रसहितमूर्धानः १५ प्रत्यूषे.

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

यत्र ग्रामेऽहौषुरग्निहोत्राणि श्रुतिपारगाः ।
यतः समुत्थितो धूमः खमाक्रामद्गृहे गृहे ॥ १६

विप्रा होमतटाकेऽस्नुरथ वासांस्यनेनिजुः ।
अजपन्नपि सावित्रीं तद्रोधःस्थितमण्डपे ॥ १७

हरिद्राघर्षणव्यग्रशिञ्जद्वलयपाणयः ।
संलपन्त्यः कथा नैकाः क्वचित्सस्नुर्वराङ्गनाः ॥ १८

कौण्डिन्यान्वयदुग्धाब्धिमौक्तिकद्विजपुंगवः ।
तौदात्विकनृपाद्रामं तं प्रापर्दुपदीकृतम् ॥ १९

तदन्वये लब्धजन्मा श्रुतिस्मृत्यब्धिपारगः ।
अभून्मार्गसहायाख्यो विद्वन्मणिमर्चितः ॥ २०

निसर्गशुभ्रगात्रस्य निष्कलङ्कहृदम्बुजम् ।
श्रुतिस्मृतिपुराणानि यथाकालमशिश्रियन् ॥ २१

सोऽध्यापिपच्छिष्यवर्गान्प्रातर्गुण्यान्वटून्बहून् ।
स्मार्तकर्माण्याचरतामाचार्यत्वमवोढ च ॥ २२

नक्तं रामकथां श्रोतुं बहवस्तद्वितर्दिकाम् ।
श्रयन्ति स्म द्विजा भक्त्या सस्त्रीबाला दिन दिने ॥ २३

---

१. होमं कृतवन्तः २. यतः = यस्मादग्निहोत्रात् ३. आक्रामत् Cf. Pāṇ 1-3-40 ४. अनेनिजुः = शोधितवन्तः ५. तदात्वे विद्यमाननृपादित्यर्थः ६. उपदीकृतं = संमानितं ७. स्वभावत एव गौरवर्णशरीरस्य ८. दोषलेशविकलहृदयं ९. अश्रयन् = स्वयमेवेति शेषः १०. अध्यापयत् ११. प्रशस्तगुणसंपन्नान् १२. अवोढ=वहति स्म, लुङ् .

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

न तस्य पुरतः कश्चिदंसे बृहतिकां वहन् ।
अदृश्यत पुमांस्तत्र ग्रामे पाण्डित्यगौरवात् ॥ २४

तस्य लक्ष्मीरिति ख्याता समग्रललनागुणा ।
अद्वितीया द्वितीयाभूच्छाया दिनमणेरिव ॥ २५

तयोः कालेन दंपत्योस्तनयाः पञ्च जज्ञिरे ।
येषां हि भ्रातृवात्सल्यं पाण्डवांस्तानसँस्मरत् ॥ २६

सर्वेऽप्यधीतिनो वेदे बुद्धिमन्तः शुचिव्रताः ।
रामायणमहाकाव्यगाने कुशलवोपमाः ॥ २७

तस्य मार्गसहायस्य जातसूनुषु पञ्चसु ।
द्वितीयो ह्यद्वितीयोऽभूत्प्रतिभाया निदर्शनम् ॥ २८

शुक्लेऽब्दे माधवे शुक्ले द्वादश्यां स्थिरवासरे ।
स जातः शुक्लचित्तोऽभूत्कृष्णो नाम्नैव केवलम् ॥ २९

युवाब्दे मेषगे भानावुपनीतो यथाविधि ।
असौ कुशाग्रधिषणस्त्रयीमाधिजगेऽचिरात् ॥ ३०

कणशः कणशश्चैव सकृदस्य श्रुतिं गताः ।
बहवो विषयास्तस्थुः सिक्थे हेमकणा इव ॥ ३१

---

१. उपरितनवस्त्रम् २. विद्वत्त्वमहिम्ना ३. असदृशी इत्यर्थः ४. 'द्वितीया सहधर्मिणी' इत्यमरः ५. छायादेवी ६. पाण्डुसुतान् ७. अस्मारयत् इत्यर्थः ८. शुक्लसंवत्सरे ९. शुक्लपक्षे १०. शुद्धचित्तः ११. नामनि कृष्णशब्दघटितत्वात् १२. युवनामसंवत्सरे १३. अध्यगीष्ट १४. किंचित्किंचित् इति रीत्या १५. सकृत् = एकदा १६. सिक्थे = सुवर्णकारसमीपस्थितमधूच्छिष्टपिण्डे १७. हेमकणाः सुवर्णचूर्णाः.

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सकृच्छ्रुतधरत्वं हि दृष्ट्वास्मिन्नन्यदुर्लभम् ।
व्यस्मेषत[1] सतीर्थ्यास्ते परमस्मै न चेर्ष्यिषुः[2] ॥ ३२

नित्यं वाल्मीकिसंदर्भं[3] पठत्यस्मिन्हि सुस्वरम् ।
तदर्थं[4] तु पितान्येभ्यो विवृणोति स्म भक्तितः ॥ ३३

कदाचित्तन्मुखादेव श्रुत्वा प्रवचनं जनाः ।
तद्विवेचनचातुर्याभूवंश्चित्रार्पिता इव ॥ ३४

तस्य कण्ठध्वनिं रम्यं श्रुत्वा संदिदिहे जनः ।
नूनं स्ववल्लकीतन्त्रीं नुदत्येषा सरस्वती ॥ ३५

ततः कालप्रकोपेन धातृसंवत्सरे महान् ।
अवग्राहः[5] प्रादुरासीत्सर्वानुद्वेजयञ्जनान् ॥ ३६

तदोपस्करदौर्लभ्य[6] जृम्भमाणे दिने दिने ।
इतिकर्तव्यतामूढा चिक्लिशे[7] जनता भृशम् ॥ ३७

हित्वा मार्गसहायोऽथ ग्रामं तं कृच्छ्रदायकम् ।
प्रयेते[8] गन्तुमन्यत्र सकुटुम्बो द्विजाग्रणीः ॥ ३८

अथ सह्यनगोद्भूततरङ्गिण्यास्तटेऽमले ।
कावेर्याः प्राप्य ते सर्वे नृसिंहपुरमावसन् ॥ ३९

---

१. व्यस्मेषत आश्चर्ययुक्ता जाताः २. ईर्ष्यां न चक्रुः ३. संदर्भ = ग्रन्थं; रामायणमित्यर्थः ४. रामायणार्थं ५. पुत्रवदनादेव ६. तत्कर्तृकतात्पर्यविवरणचातुर्यात् ७. तन्मुखे कृतवासा वाणी स्ववीगातन्त्रीमङ्गुल्या घट्टयतीति ८. कालदोषेण ९. 1876 A.D. १०. वृष्टिप्रतिबन्धः ११. उपस्कर = गृहोपकरणवस्तु १२. कर्तव्यविषयज्ञानशून्या १३. जनता = जनसमूहः १४. प्रयेते = प्रयत्नं चक्रे १५. नृसिंहपुरं = करुप्पत्तूर ग्राममू.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

यत्र प्रस्यन्दमानां तां सह्यजामतिविस्तृताम् ।
न पुमानप्लवं[1] शक्तस्तरीतुं विप्लवं[2] विना ॥ ४०

तं नदीमातृकं दभ्रगेहं[3][4] संख्येयवाडवम्[5] ।
प्राप्योषुर्निर्वृता ग्रामं स्वकर्मनिरता अमी ॥ ४१

तत्राभूत्पद्मनाभाख्यधार्मिको[6] धनिकोत्तमः[*] ।
यदुपन्नो[7] निजं धर्ममन्वतिष्ठत्सुधीरयम् ॥ ४२

तत्राप्यध्यापिपच्छात्रान्कर्मठानप्ययाजयत् ।
नक्तं चाश्रावयद्रामायणं श्रोतॄन्प्रहर्षयन् ॥ ४३

कृष्णो वेंकटपूर्वो द्वितीयतनयोऽस्य काव्यसारज्ञः ।
द्वादशवर्षवयस्कोऽप्यभूद्गृही[8] स हि गुरूक्तिपरतन्त्रः ॥ ४४

अब्दे तस्मिन्नेव स गुरुणा रामायणं समुद्दिष्टः[9] ।
रामकथामृतपानादसकृद्[10][11]ग्मित्वमाप सहसैव ॥ ४५

अथ सर्वजिति तुलायां जननीं स्वरितां प्रसूय पुमपत्यम्।
गुर्वोर्[12]मिथश्च दृष्ट्वा प्रतीपभावं स विव्यथेऽत्यन्तम् ॥ ४६

---

१. अप्लवं = प्लवं विना (क्रियाविशेषणम्) २. विपदं ३. नद्यम्बुसंपदा व्रीहिमन्तं ४. दभ्रगेहं = अल्पसंख्याकगृहकलितम् ५. संख्येयवाडवं = अल्पसंख्याकब्राह्मणम् । ६. यदुपन्नः = यदाश्रयः (बहुव्रीहिः) ७. गृहस्थः ८. गुरुशब्दोऽत्र जनकवाचकः ९. समुद्दिष्टः = उपदिष्टः १०. असकृत रामकथामृतपानादित्यन्वयः ११. प्रशस्तवाग्विशिष्टत्वम् १२. गुर्वोः = जनकश्वशुरयोः ; प्रतीपभावं = वैमनस्यमिति यावत् एतस्यैवानन्तरश्लोकेन विवरणम्.

---

*धनिको धार्मिकोत्तमः इति पाठान्तरम्

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कुटिलश्चशुरेण नीतदारो
मकरेऽथार्यमसंक्रमे प्रसह्य ।
प्रतिकूलनिवासजाममुष्याः
शुचमुन्मार्ष्टुमथार्त तत्र तत्र ॥ ४७

पर्यट्य सुबहून्ग्रामांश्चम्पकारण्यमागमत् ।
सर्वजिद्धायने तत्राध्यगीष्टान्वीक्षिकीमयम् ॥ ४८

समापप्तन्व्यतिकरास्तत्रापि विधिचोदिताः ।
नभस्ये हि नभस्यब्दसंचारे कारणं कुतः ? ॥ ४९

विरोधिनोऽप्यतिक्रम्य विरोध्यब्दं निनाय सः ।
प्रकृत्याविकृतिश्चित्ते विकृत्यां विदिशं ययौ ॥ ५०

अनन्तशयनक्षेत्रे मासान्कतिपयानयम् ।
वसन्हिं भूयसां प्रापद्बुधां परिचयं प्रधीः ॥ ५१

वर्णक्रमान्तानिगमे सुपरीक्षितोऽसौ
श्रीवञ्चिभूपतिविभूषितराजधान्याम् ।

---

१. अथ आत इति छेदः । अत सातत्यगमने । लिटि रूपम् । २. आन्वीक्षिकीं = तर्कशास्त्रम् । ३. समापप्तन् = समापतन्नित्यर्थः (पतः पुम्) ४. सिंहमासे ५. नभसि = आकाशे ६. विरोधिनः स्वप्रत्यर्थिनः द्वेषिण इति यावत् । विरोध्यब्दं = विरोधिसंवत्सरम् . प्रकृत्या = स्वभावेन । अविकृतिः = विकाररहितः । विकृत्यां = विकृतिसंवत्सरे । विदिशं = दिशोर्मध्यं निर्ऋतिदिशं इति यावत् ॥ ७. मासान्कतिपयानिति । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । ८. प्रधीः = प्रकृष्टबुद्धिः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

सन्मानितोऽथ निजसंवसथं प्रविष्टो
मध्ये प्रशस्तिमभजन्निजबन्धुतायाः ॥ ५२

अब्दान्प्रतीक्ष्य चतुरश्चतुरोऽप्यदर्श-
ञ्जान्तं स पत्न्यविनयस्य यदा सहिष्णुः ।
तातज्ञयैव स खरे विदधेऽधिविन्ना-
मेनां कुलाधिललनास्वृजुता कथं स्यात् ॥ ५३

चम्पारण्यं पुनर्गत्वा नीलकण्ठमखीन्द्रतः ।
तर्कं पुनरधीयानः संगतो राजुशास्त्रिभिः ॥ ५४

सुश्लक्ष्णपदविन्यासामस्य भाषणचातुरीम् ।
दृष्ट्वा श्रीत्यागराजानां प्रीतिरस्मिन्पराजनि ॥ ५५

अप्पय्याभिजनोदन्वच्छुद्धमुक्ताफलायिताः ।
चतुस्तन्त्रमहाम्भोधिपारगाः किल ते मताः ॥ ५६

तेषां च करुणादृष्टिपावितो भाट्टदीपिकाम् ।
अधीत्य तातपादानां संनिधिं पुनराव्रजत् ॥ ५७

काञ्ज्यालयाख्यलघुसंवसथेऽनुरूप-
वंशेऽवलोक्य कुलशीलवयःप्रकृष्टाम् ।
श्रीरुक्मिणीमयमुपायत तातशिष्टो-
ऽथाध्यापयन्कतिपयान्स्वगृहे न्यवात्सीत् ॥ ५८

---

१. चतुरः चतुःसंख्याकान् २. चतुरोऽपि = समर्थोपि ३. अधिविन्नाम् = उत्पन्नसपत्नीकाम् ४. कुलाधिललनासु = कुलस्यैवाधिभूतवनितासु ५. नीलकण्ठ-मखीन्द्रोऽयं कथानायकमातुर्बान्धवः कश्चित्पण्डितः ६. काञ्जिकोविल् इति प्रसिद्ध-ग्रामे ७. उपायत = पर्यणेष्ट.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सोऽयं सुधीरगमदार्द्रकपालनाम्नीं[1]
कांचित्पुरं बहुजनाकुलितां स तत्र ।
संदृश्य शृङ्गगिरिसंयमिनो निवृत्य
नन्दन्नयापयदसावपि नन्दनाब्दम् ॥ ५९

प्राप्तेऽब्दे विजये[2] मधौ[3] चिरतरक्लिष्टे रुजास्तं गते
तातेनैकविधैर्गृहव्यतिकरैरत्यर्थमन्तर्मनाः ।
मुक्त्वा संवसथं बहुत्र विचरन्कोयम्बुदूरं गत-
स्तत्रत्यैर्विबुधैरसौ परिचयं लब्ध्वावसत्तत्पुरे ॥ ६०

कृष्णार्यनामातिपवित्रकीर्ति-
रिभ्योत्तमः[4] कश्चिदिमं निदेध्यौ[5] ।
यो वेदशास्त्रोद्धरणाय कंचिद्-
विद्यालयं निर्वहति स्म धन्यः ॥ ६१

तेनायमाहूय समादरेण
चित्पुर्यभिख्यां पुरमाशु निन्ये ।
विद्यालयं तस्य विलोक्य विद्वद्-
विजृम्भितं साधु विसिष्मियेऽसौ[6] ॥ ६२

चित्पुरीति कथिता नगरी सा
विप्रभूमकलिता प्रविभाति ।
दक्षिणेन किल तां मधुरापा
स्यन्दतेऽतिविमला सरिदेका ॥ ६३

---

१. आर्द्रकपालनाम्नीं = ईरोडाख्यां २. विजयवत्सरे ३. मेषमासे ४. इभ्योत्तमः = धनिकश्रेष्टः ५. निदध्यौ = ददर्श ६. खादुसलिला.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

केनापि पुण्यपुरुषेण विनिर्मितोऽस्या-
स्तीरे विभाति बहुसङ्गयुतोऽग्रहारः ।
तन्मध्यवर्तिरुचिरालयभासुरः श्री-
रामोऽस्ति भक्तजनरक्षणजागरूकः ॥ ६४
सर्वे स्वकर्मनिरता अवनीसुरास्ते
कल्ये वर्गाह्य[1] सरितं कृतपुण्यकृत्याः ।
भक्त्या प्रणम्य परया किल राममूर्तिं
कुर्वन्ति कृत्यमनुघस्रम[2]थात्मनीनम्[3] ॥ ६५
प्राच्यामवाच्यां[4] च शिवालयौ द्वौ
ग्रामादुदारौ तटिनीनिवृत्तान् ।
प्रातः प्रदोषे च महेश्वरस्य
घण्टारवैराह्वयतोऽर्चनाय ॥ ६६
नास्तिक्यं परितो विसृत्वरमसौ[5] यत्नात्प्रमार्ष्टुं वटू-
नध्याप्यागममाम[6]रीमपि गिरं नेतुं च तान्सत्पथे ।
विद्यामन्दिरमेकमत्र रुचिरं द्राङ् निर्ममो निर्मम[7]
कृष्णार्यः सुकृती प्रशस्यगुणभाक्सर्वास्तिकाग्रेसरः ॥
प्रकृत्या नैपुण्यं गुरुषु विनयः शौचमृजुता
शिवे भक्तिर्दीनेष्वनुपमदया वाचि नियमः ।
अमीभिर्द्रष्टव्यो यदि गुणगणैरेकपुरुषः
स कृष्णार्यादन्यः क्व खलु भविताऽस्मिन्कलियुगे ॥

---

१. मङ्क्त्वा २. अनुघस्रं = प्रतिदिनं ३. आत्मनीनम् = आत्मने हितम् । Cf. Pāṇ. 5-1-9 ४. अवाच्यां = दक्षिणतः ५. विसृत्वरं = प्रसरणशीलं ६. आमरीं गिरं = संस्कृतभाषां ७. स्वार्थताहीनः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

श्रीकृष्णार्यप्रतिनिधिरयं तस्य विद्यालयस्य
मुख्याचार्यः स्ववहितमना निर्वहन्सर्वकृत्यम् ।
नैकाञ्छिष्यानथ च भृतकाञ्छिक्षकांश्च प्रवीणान्
प्रेम्णा पश्यन्नखिलहृदयावर्जकोऽभूच्चिराय ॥ ६९
समाप्लुत्य धुन्यामनुष्ठाय संध्या-
दिकं शिष्यवर्गैः प्रतोलीं विशन्तम् ।
त्रयीघोषपूर्वं ह्यमुं वीक्ष्य कल्ये
जना भक्तिनम्रा भृशं व्यस्मयन्त ॥ ७०
अध्यात्मशास्त्रविकलस्य हि शुष्कविद्या
बन्धाय केवलमिति प्रविचिन्त्य बुद्ध्या ।
अध्येतुमौपनिषदीमचिरेण विद्यां
वृत्तिं विधूय निरगादथ चित्पुरीतः ॥ ७१
क्षेत्रं प्रसिद्धमथ पञ्चनदेश्वरस्य
सह्याद्रिजाततटिनीतटराजमानम् ।
प्रख्यातपण्डितकुलाध्युषितं चिराय
प्रेप्सन्नविक्षदसकौ निगमान्तविद्याम् ॥ ७२
विद्वन्मण्डलमण्डनं गुणनिधिं शास्त्रेषु पारंगतं
दृष्ट्वा सोमसुतं दयानिधिमसौ श्रीबालकृष्णाभिधम् ।
आश्रित्याधिजगेऽथ शंकरगुरोर्भाष्याण्यमुष्माद् गुरो-
रभ्यास्थच्च कुशाग्रशातधिषणः श्रौतं समग्रं ततः ॥

---

१. अयं = प्रकृतकथानायकः २. सावधानचित्तः ३. तिरुवैयारुरम् ४. सोम-सुतं = सोमयाजिनं ५. सूत्रभाष्योपनिषद्भाष्यगीतभाष्याणि ६. शात = तीक्ष्ण ७. ततः = 'तस्माद्गुरोः' इति 'पश्चात्' इति वा अर्थः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अस्थानत्रयभाष्येऽधीतिनमेनं निशम्य कृष्णार्यः ।
निजविद्यालयमेनं पुनरपि निन्ये समेत्य पञ्चनदात् ॥

अथ कृष्णार्यपुरोगा आस्तिकवृद्धाः[1] समेत्य धर्मिष्ठाः ।
शांकरभाष्यश्रवणं व्यदधुः प्रत्यहमिमं पुरस्कृत्य ॥ ७५

वृद्धानां पुरतस्तेषामाचार्यस्तरुणोऽप्ययम् ।
सनकादीनुपदिशदक्षिणामूर्तिवद्भभौ ॥ ७६

अधानाध्यक्षत्वं वहति पुनरस्मिन्बुधवरे
कलाशालाकीर्तिर्दिशि दिशि तथाभूद्विसमरा ।
यथा व्युत्पित्सूनामहरहरिहाध्येतुमनसां
वटूनां संबाधाद्[2]जनि निबिरीसं[3] गृहमिदम् ॥ ७७

वात्सल्यं विदुषां, सुखेन वसतिः, सौशील्यसंपादनं,
व्युत्पत्तिः सुदृढाचिरेण निगमे काव्येषु शास्त्रेष्वपि ।
कृष्णार्यस्य वदान्यतेति च गुणाः संख्याविहीना वटू-
नाकर्षन्ति हि चित्पुरीं परिसरग्रामौघतः[4] संघशः ॥ ७८

श्रीमद्रामकथामृतमाशयतोऽमुष्य संततं श्रोतॄन् ।
कण्ठध्वनिमतिललितं न ह्यनुकर्तुं वनप्रियोऽप्यैष्ट[5] ॥ ७९

आबालवृद्धमखिलग्रामीणप्रीतिभाजनीभूतम् ।
पण्डितमिमं हि लब्ध्वा कृष्णार्योऽमंस्त धन्यमात्मानम् ॥

---

१. आस्तिकवृद्धाः 'ग्रामस्था' इति शेषः २. व्युत्पित्सूनां=व्युत्पत्तिं प्राप्तुममिलषतां ३. संबाधात्=संमर्दात् ४. निबिरीसं=निविडम् ५. परिसरग्रामौघतः=समीपवर्तिग्रामसमूहतः ६. वनप्रियः=कोकिलः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अथाभिलष्यन्किल तीर्थयात्रां
विधातुमासेतुहिमालयागम् ।
गीर्वाणवाण्या व्यवहारदक्षं
कृष्णार्य एनं ह्यनुगं चकार ॥ ८१

एकेन चायव्ययलेखकेन
गुणेन चान्येन गुणाकरेण ।
उभौ प्रमादीचसमाख्यवर्षे
संप्रास्थिषातां प्रयते मुहूर्ते ॥ ८२

जगाहिरे ते तटिनीः सुपुण्याः
क्षेत्रेष्वदर्शन्सुबहूश्च मूर्तीः ।
न्यशामयंश्चापि पुरीः प्रसिद्धाः
सद्भिश्च नैकैः परिचिक्रियरेऽथ ॥ ८३

मासान्परिभ्रम्य षडेवमन्ते
स्वकीयमोको न्यवृतन्सुखेन ।
वार्ताश्च वार्ता बहुला गदन्तो
व्यस्मापयन्पौरजनांश्चिराय ॥ ८४

कृष्णार्यषट्यब्दमहे निवृत्ते
सोऽयं बुधस्तत्र न दीर्घकालम् ।

---

१. आसेतुहिमालयागम् = रामेश्वराद्धिमवत्पर्वतपर्यन्तम् २. गुणेन = पाचकेन
३. न्यशामयन् = अपश्यन् ४. परिचिक्रियरे = परिचयं लेभिरे ५. ओकः = स्थानं
६. वार्ताः = निरामयाः ७. वार्ताः = वृत्तान्तान्

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विद्यालयेऽवोढ निजं नियोगं
व्यत्येति कालेन हि सर्वमेव ॥ ८५
वत्सरेऽथ [1]नलनाम्न्युपागते
दुर्दशास्य सदने हि काप्यभूत् ।
येन वृत्तिरहितः कियन्तम-
प्यत्यवाहयत कालमुन्मनाः ॥ ८६
क्षेत्रे नामे[2]गिरावथात्मवसतिं कुर्वन्कथानायको
मासान्कांश्चिदसौ कलालयवटूनध्यापयन्संस्कृतम् ।
भस्मच्छन्न इवानलो जनतया दृष्टोऽनुकम्पाभराद्
यो[3]वत्सागरसंभवासकरुणापाङ्गप्रसारोदयम् ॥ ८७
उदितेऽथ भागधेये सहसैवान्तर्दधेऽस्य दुरवस्था ।
क्षे[4]णमपि तमसो न भवति पुरतस्तरणेः समुद्यतः पटली ॥
महीशूरपुर्यामथो कृष्णराज-
प्रतिष्ठापितां तां महापाठशालाम् ।
क्षितीन्द्राज्ञया वेदभाष्यादिकाध्या-
पनाय प्रविष्टो मुदा पिङ्ग[5]लान्ते ॥ ८९
तत्राप्युष्य महाविद्वत्पदवीं प्रापितस्य हि ।
मैत्र्या विद्वद्वरैः साकं प्रत्यहं प्रावृधत्प्रथा ॥ ९०

---

१. नलसंवत्सरे = 1916 A.D. २. नामगिरि = 'नामक्कल्' ३. 'लक्ष्मीकटाक्षोदयपर्यन्त'मित्यर्थः ४. तमसः पटली, समुद्यतः = उदयं प्राप्नुवतः, तरणेः = सूर्यस्य, पुरतः = अग्रे, क्षणमपि न भवति न स्थितिं लभते इति भावः ५. पिङ्गलान्ते = पिङ्गलवत्सरचरमभागे = 1918 A.D.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

स्वयं वेंकटकृष्णः सन्कृष्णार्येणादृतः पुरा ।
ततः श्रीकृष्णराजेन्द्रं प्रापितः कृष्णशास्त्रिणा ॥ ९१

साङ्गेषु वेदेष्वथ दर्शनेषु
सर्वेषु काव्येष्वपि शिक्षकाणाम् ।
विद्यार्थिनां चैव कुलेन सोऽभूद्
विद्यालयः सुप्रथितः सुराज्ञः ॥ ९२

स तत्र [1]नवतामगाद[2]नवमोऽखिलानां बुधां
भजन्[3]नवनवैर्बुधैः परिचयं गुणौघाकरः ।
उवास [4]नव वत्सरान्सदसि कृष्णराजप्रभो-
र्यशोऽस्य वदृधेऽन्वहं [5]सुदि सुधांशुरोचिर्यथा ॥ ९३

धारापतिरिव भोजः परमदयालुः कवीन्द्रकल्पद्रुः ।
काव्यरसज्ञो धीमान्कृष्णमहीन्द्रः कवीन्[6]समाददे ॥ ९४

सरसालंकृतपद्यप्रणयनपटिमानुगुण्येन ।
द्रविणौघेन कवीन्द्रानुपकार्यायां [7]समार्चिचत्सुबहून् ॥ ९५

कठिनतरानपि विषयान्सकृच्छ्रुतानेव यन्मुखाच्छिष्याः ।
लघु बुध्यन्ते तेषामाचार्याणामभूदयं [8]प्रेष्ठः ॥ ९६

गीर्वाणवाण्या व्यवहारकाले
तद्वाग्मितां वीक्ष्य विपश्चितोऽपि ।

---

१. नवतां = प्रत्यग्रभावं २. अनवमः = अनपकृष्टः ३. नवनवैः = नूतननूतनैः
४. नव = नवसंख्याकान् ५. सुदि = शुक्लपक्षे ६. समाददे = आदरं चक्रे
७. उपकार्यायां = प्रासादे ८. प्रेष्ठः = अग्रेसरः.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अपूर्वशैलीप्रतिपित्सयेव
सभास्वदृश्यन्त सविस्मयास्याः ॥ ९७

विद्यार्थिवर्गमसकौ सुतानिर्विशेष-
मध्यापकान्सवयसो निजसोदरांश्च ।
संख्यावतश्च गुरुवद्वयसातिवृद्धान्
पश्यन्सुधीः समभवत्सकलाभिगम्यः ॥ ९८

नैकेषु विद्वत्स्वपि संगतेषु
अप्यागतो वेंकटरामशास्त्री ।
इति स्म पृच्छन्स सभाधिपोऽमुं
स्मेराननः पश्यति संप्रहृष्टः ॥ ९९

अथ प्रभवहायने विरतिभाजि विद्यालये
स्वदेशगमनोन्मुखे बुधजने तथाधीतिषु ।
असौ च निजबन्धुतां हरिति कुम्भयोनेः स्थितां
सजानिरवलोकितुं मतिमधत्त विद्वन्मणिः ॥ १००

स पञ्चवर्षदेशीयबालकेन च भार्यया ।
सीतया सुतया चार्द्रकपालपुरमाययौ ॥ १०१

---

१. प्रतिपित्सया = अधिगन्तुमिच्छया २. सवयसः=समानवयस्कान् ३. संख्यावतः = पन्डितान् ४. सर्वैरभिगम्यः ; कलावद्भिः अभिगम्यः ; सकलवत् = चन्द्रवत् (संतोषजनक इति हेतुना) अभिगम्य इति वा यथोचितमभिप्रायभेदः ५. स्मेराननः = स्मितभूषितमुखः ६. कुम्भयोनेः अगस्त्यस्य हरिति दिशि दक्षिणदिशीत्यर्थः ७. आर्द्रकपालपुरं = ईरोडुनगरं.

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

स तत्र निन्ये कतिचिद्दिनानि
संभाज्यमानो[1] निजबन्धुवर्गैः।
सुतां स्विकां[2] चेन्नपुरीं यियासुं
सीतां समादाय ततः प्रतस्थे ॥ १०२

नीत्वा चेन्नपुरीं स्विकां दुहितरं प्रापय्य पत्युर्गृहं
द्वित्रैरेव दिनैर्महीसुरपुरीं प्रस्थास्यमानः सुधीः।
ईक्षित्वाशु स कुम्भघोणनगरे नारायणं स्वानुजं
प्रायासीत्त्रिशिरःपुरीमथ पुरं शैलं च नामोपलम्[3] ॥१०३

तत्र स्वादधमर्णादवेत्य[4] नष्टं स्वकीयसर्वस्वम्।
नैराश्यं प्रतिपन्नो गर्भपुरीमभिजगाम सहसासौ ॥ १०४

बन्धुं मातृमुखानभिज्ञमतुलप्रेम्णात्मसंवर्धितं
यं द्रष्टुं समुपागमत्स विधिनाकृष्टः स्वगेहाद्बहिः।
निष्क्रम्याग्रजवीक्षणाय परितो भ्राम्यन्नदृष्ट्वैव तं
प्रत्यायादिति विप्रलम्भविषयीभूतावुभौ भ्रातरौ ॥ १०५

बहिश्चरप्राणसमानुजस्य
श्रीरामनाथस्य दिदृक्षितस्य।
अतर्कितस्तत्र वियोग एतं
नितान्तमन्तर्मनसं व्यधत्त ॥ १०६

---

१. आद्रियमाणः २. नामकल् इति स्थलम् ३. स्वस्माद्गृहीतर्णात् ४. स्वकीय-- जननद्वादशदिन एव विनष्टजननीकम्.

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तत्राप्य हृद्यमनवद्यमथाद्यमस्य[1]
विश्रान्तिमेत्य पुनरार्द्रकपालनाम्नीम् ।
सायंतनेन शकटेन पुरं[2] यियासो-
स्तादात्विकीं हृदयवृत्तिमहो न विद्म ॥ १०७

आरुह्य वार्षभमनः[3] किल धूमयान-
शालां गतस्य नचिराद्धृदयं पफाल ।
सद्यो हि मूर्छितममुं पुनरेव गेहं
भ्रातुर्निनाय सुकृती स हि दण्डपाणिः[4] ॥ १०८

तं निश्चलेन वपुषा शयितं विसंज्ञं
स्वस्यैव हन्त सदनस्य वितर्दिकायाम् ।
सद्यो निवृत्य सुपरीक्ष्य च रामनाथः
प्रापादि कीदृशदशां न हि वक्तुमीशे ॥ १०९

अथ परिजनवर्गे निर्निमेषोपविष्टे[5]
कलितनयनबाष्पे चैव चेक्षीज्यमाने[6] ।
उदभवदतिदीर्घश्वास एको निशीथे
तनुमपि परिहृत्यास्यासवस्ते प्रशेमुः ॥ ११०

---

१. आद्यं = अदनीयम् २. पुः शब्दः, न पुरशब्दः ३. वार्षभं = वृषभयुक्तं, अनः=शकटं ४. स्वकीयभ्रातृजामाता ५. अक्षिनिमीलनं विनैवोपविष्टे ६. चेक्षीज्यमाने अव्यक्तस्वरेण रुदतीत्यर्थः। क्षीज अव्यक्तशब्दे इति धातुः.

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

*त्यक्त्वा मामिह यत्प्रजीनवपुषं[1] यातोऽसि दूरे पुरीं
पुण्यां पुण्यजनत्वभागसि ततस्त्वं मूढ कुक्षिंभरिः ।
इत्येवं मयि विप्रियं स कलयञ्श्रीगर्भपुर्योकसं
मत्वा भ्रातरमात्मजं निजवपुस्तत्याज तत्संनिधौ ॥ ११९

त्रयश्चतस्रश्च सुतास्तदीया-[2]
स्तत्कृत्यजातं किल सह्यजायाः ।
कूले यथावद्विनिवर्त्य तं द्राक्
संतारयामासुरमुत्र भक्त्या ॥ ११२

वेदार्थाञ्शृणवाम कस्य वदनादद्य श्रवोभिस्तथो-
पन्यासानपि संस्कृतैः सुमधुरश्लक्ष्णैः पदैर्गर्भितान् ।
तत्तादृग्रसगर्भितं प्रवचनं रामायणे चेति त-
द्वैदुष्यप्रतिभार्जवादिगुणविद्विद्वद्गणाश्चक्षते ॥ ११३

कृष्णमूर्त्यपराख्येन रामकृष्णेन सादरम् ।
स्वतातचरितस्यायं सारोऽलेखि यथामति ११४

K. V. Krishnamoorthy
12-2-63

---

१. जीर्णकायं २. सुतत्रयसुताचतुष्टयघटितः 'सुताश्च सुताश्च सुताः' इति द्वंद्वगर्भितद्वंद्वसमासः.

---

*अनेन श्लोकेन कविः स्वशोकं विवृणुते.

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

Peculiar verbal forms used in :

Śloka

2 स्फायते = स्फायी ओ प्यायी वृद्धौ
3 अभुः = भा दीप्तौ
4 बभुः = भा दीप्तौ
5 असिचन् = षिच क्षरणे
6 रटन्ति =
7 खदन्ते = खद आस्वादने
8 जगुः = गै शब्दे
13 अदुहुः = दुह प्रपूरणे
,, अमन्थिषुः = मन्थ विलोडने
16 अहौषुः = हु दानादनयोः
17 अस्नुः = ष्णा शौचे
,, अनेनिजुः = णिजिर् शौचपोषणयोः
18 सस्नुः = ष्णा शौचे
19 प्रापत् = आपॢ व्याप्तौ
21 अशिश्रियन् = श्रिञ् सेवायाम्
22 अध्यापिपत् = अधि + इ Causal form Aorist.
,, अवोढ = वह प्रापणे Aorist.
26 जज्ञिरे = जनी प्रादुर्भावे
,, असस्मरत् = स्मृ चिन्तायाम् Causal Aorist.
30 अधिजगे = इङ् अध्ययने नित्यमधिपूर्वः
32 व्यस्मेषत = ष्मिङ् ईषद्धसने
,, ऐर्ष्यिषुः = ईर्ष्य ईर्ष्यायाम्
33 विवृणोति = वृञ् वरणे

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

Sloka

37 चिक्लिशे = क्लिश उपतापे
41 ऊषुः = वस निवासे
43 अयाजयत् = यज देवपूजासंगतिकरणदानेषु.
46 विव्यथे = व्यथ भयसंचलनयोः
47 आत = अत सातत्यगमने
48 अध्यगीष्ट = इङ् अध्ययने नित्यमधिपूर्वः Aorist
49 समापपत्तन् = सम + पत्लृ पतने Aorist
53 अदर्शत् = दृशिर् प्रेक्षणे Aorist
,, विदधे = वि + धा
55 अजनि = जनी प्रादुर्भावे
58 उपायत = उप + यम उपरमे
59 अयापयत् = या प्रापणे Causal
61 निदध्यौ = नि + ध्यै चिन्तायाम्
63 स्यन्दते = स्यन्दू प्रस्रवणे
67 निर्ममे = निर् + माङ्माने
71 निरगात् =
72 अविक्षत् = विश प्रवेशने
73 अभ्यास्थत् = अभि + अस क्षेपणे
78 आकर्षन्ति = कृष विलेखने
79 ऐष्ट = ईश ऐश्वर्ये
80 अमंस्त = मन ज्ञाने
82 संप्रास्थिषाताम् = सं + प्र + स्था Aorist
83 जगाहिरे = गाहू विलोडने
,, न्यशामयन् = नि + शमोऽदर्शने
,, परिचिक्यिरे = परि + चिञ् चयने
84 न्यवृतन् = नि + वृतु वर्तने
,, व्यस्मापयन् = वि + ष्मिङ ईषद्धसने Causal

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

Śloka

85 व्यत्येति = वि + अति + इ

90 प्रावृधत् = प्र + वृधु वर्धने

93 अगात् = इण् गतौ

94 समादद्रे = सम् + आ + दृङ् आदरे

95 समार्चिचत् = सम् + अर्च पूजायाम् Causal

96 वुध्यन्ते = वुध अवगमने 4th Conj.

103 प्रायासीत् = या प्रापणे

107 विद्म = विद ज्ञाने

108 पफाल = स्फला विशरणे

109 प्रापादि = प्र + पद गतौ Aorist

110 प्रशेमुः = प्र + शमु उपशमे

113 चक्षते = चक्षिङ् व्यक्तायां वाचि

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

Metres used in this work.

छन्दस्		Slokas
1.	उपजाति	(प्रार्थना-1), 62, 81, 82, 83, 84, 97, 99, 102, 106, 112.
2.	आर्या	(प्रार्थना 2-4), 44-46, 74, 75, 79, 80, 88, 94, 95, 96, 104.
3.	अनुष्टुभ्	1-43, 48-51, 54-57, 76, 90, 91, 101, 114.
4.	वसन्तमालिका	47.
5.	वसन्ततिलका	52, 53, 58, 59, 64, 65, 71, 72, 98, 107, 108, 109.
6.	शार्दूलविक्रीडित	60, 67, 73, 78, 87, 103, 105, 111, 113.
7.	स्वागता	63.
8.	इन्द्रवज्रा	66, 85, 92.
9.	शिखरिणी	68, 77.
10.	मन्दाक्रान्ता	69.
11.	भुजंगप्रयात	70, 89.
12.	रथोद्धता	86.
13.	पृथ्वी	93, 100.
14.	मालिनी	110.

Kirtikant Sharma Collection, Najafgarh

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

श्रीकृष्णार्यस्मरणम् ।

यच्चित्ते यस्य महात्मनः सुमनसामाविर्भवन्ति क्षणा-
त्पुण्यश्लोकसमर्हणीयकृतयः सत्रा प्रशस्यैर्गुणैः ।
ख्यातिः सान्यजनेष्वपि व्यवहृतेरासीत्समप्रीतये
वेत्ता साधु स धर्मशीलविदितः कृष्णार्यनामाभवत् ॥ १ ॥

दग्धुं प्राक्तनकर्मवृन्दमखिलं ज्ञानं परं साधनं
शास्त्रज्ञैः सदयं प्रदाप्य सुबहूंश्छात्रान्स्वयं धर्मवित् ।
त्रातुं तान्सुतनिर्विशेषमतनोद्विस्तीर्णविद्यालयं
कम्रं गुण्यधरासुरोषितगृहग्रामे सरित्तीरगे ॥ २ ॥

लाङ्गूलाग्रनिबर्हिताशरगणं सोऽयं ध्रुवं मारुतिं
शालां तामवितुं नियुज्य पटलोपान्ते तमस्थापयत् ।
लावण्येन गृहान्तराणि सकलान्यत्यक्रमीन्मन्दिरं
स्यास्नुत्वं स्वमपप्रथच्च सुदृढैर्यन्निर्ममे साधनैः ॥ ३ ॥

पश्यन्नामनतोऽनिशं श्रुतिमथो काव्यानि चाभ्यस्यतः
कृत्ये स्नानविधिं च निर्झरजले कृत्वोरुदघ्नेऽमले ।
धर्मान्स्वाननुतिष्ठतः प्रतिदिनं विद्यार्थिनोऽयं प्रभु-
र्मत्वा स्वं कृतिनं समापदतुलां प्रीतिं स्वयं कर्मठः ॥ ४ ॥

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

शीलं शिष्टजनोपदिष्टसरणौ संरक्षतां वर्णिनां
लक्ष्यं वीक्ष्य विदग्धताधिगमने मग्नः प्रमोदोदधौ ।
कृत्वा प्रत्यहमाशितांस्त्रिररुजोऽवित्वा च विद्यासु नि-
ष्णातांस्तानकृतेति संयमिवरादिद्धर्मशीलाभिधाम् ॥ ५ ॥

भिक्षूणामपि संततार्चनपरः क्षेत्राण्यटित्वाञ्जसा-
धोक्पुण्यं च शिवालयोत्सवकृते भूरिव्यतारीद्वसु ।
यद्येकोऽपि बहुष्वधीतिषु भवेच्छात्रो मुमुक्षुस्तदा
शम्भोः प्रीतिमवाप्नुयामिति सदाचष्टैष शिष्टाग्रणीः ॥ ६ ॥

सारल्यादि गुणौघशेवधिममुं संश्रित्य नैके जना
जीवन्त्यद्य विदिक्षु दिक्षु च महापाण्डित्यभाजो बुधाः ।
वन्दन्तेऽमुमिमे सदैव मनसोदारं हि कृष्णाभिधं
तिष्येऽस्मिन्भुवि तादृशो न सुकृती स्वप्नेऽपि संभाव्यते ॥ ७ ॥

उपरितनश्लोकसप्तकस्य सर्वेषां पादानामाद्यवर्णैः क्रमेण पठितैरधस्तनं चाक्यं संपद्यते ।

चित्पुरी वेदशास्त्रकलाशाला स्थापक धर्मशील कृष्णाभिधो यशसा जीवति ॥

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-C

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

RAYAN & IYER
Advocate of Bombay
High court
5, Transside
Building,
Near District
Court, Shivaji Nagar
PUNE 17-5

Kirtikant Sharma Collection, Najafgarh